महादेवोऽपि यस्मान्मां निःसारयितुमुद्यतः ।
तपोबलं मुनिं दान्तं म्लेच्छन्वेदपारगम् ॥
तस्मात् म्लेच्छप्रियो भूयात् शङ्करस्त्वस्थिभस्मधृक् ।
एतत्तु कामरूपाख्यं म्लेच्छैर्गुप्तं भवद्बलं ॥
स्वयं विष्णुर्न चायाति यावत् कालमिदं पुनः ।
विरलाश्चागमाः सन्तु यत्र तत्प्रतिपादकाः ॥
विरलं यस्तु जानाति कामरूपागमं बुधः ।
स एव प्राप्तकालेऽपि पूर्व्वं फलमवाप्स्यति ॥
एवमुक्त्वा वशिष्ठस्तु तत्रैवान्तरधीयत ।
ते गणाः म्लेच्छतां याताः कामरूपे सुरालये ॥
वामाऽभूदुग्रतारापि शम्भुर्म्लेच्छरतोऽभवत्" ।
इति च कालिकापुराणे ८३ अध्यायः ॥

उग्रत्वं, क्ली, (उग्रस्य भावः । उग्र + त्व ।) उग्रता । उत्कटता । तत्पर्य्यायः । चण्डता २ । इति हेमचन्द्रः ॥

उग्रधन्वा, [न्] पुं, (उग्रं धनुर्यस्य । धनुषश्चेत्यनङ् ।) इन्द्रः । इति हेमचन्द्रः ॥ ("स इषुहस्तैः स निषङ्गिभिर्वशी संस्रष्टा सायुध इन्द्रो गणेन । संसृष्टजित् सोमपा बाहुशर्ध्युग्रधन्वा प्रतिहिताभिरस्ता" । इति ऋग्वेदे । १०।१०३।३ ॥ शिवः । उग्रधनुर्विशिष्टे, त्रि ॥)

उग्रनासिकः, त्रि, (उग्रा दीर्घा नासिका यस्य ।) दीर्घनासिकाविशिष्टः । इति हेमचन्द्रः ॥

उग्रशेखरा, स्त्री, (उग्रस्य महादेवस्य शेखरं मस्तकं वासस्थानत्वेन यस्याः ।) गङ्गा । इति शब्दरत्नावली ॥

उग्रसेनः, पुं, (उग्रा सेना यस्य ।) मथुरादेशस्य राजविशेषः । स च आहुकपुत्त्रः । कंसराजपिता च । परीक्षित्पुत्त्रः । इति श्रीभागवतम् ॥ (तथा महाभारतेऽपि "जनमेजयः पारिक्षितः सह भ्रातृभिः कुरुक्षेत्रे दीर्घसत्रमुपास्ते । तस्य भ्रातरस्त्रयः श्रुतसेन उग्रसेनो भीमसेनश्च" इति । तथा च तत्रैव १।६५।४२।
"भीमसेनोग्रसेनौ च सुपर्णा वरुणस्तथा" ॥)

उग्रसेनजः, पुं, (उग्रसेनात् जायते इति । उग्रसेन + जन + ड ।) कंसनामासुरराजः । इति त्रिकाण्डशेषः ॥

उग्रा, स्त्री, (उच्यति क्षुधा सम्बध्यते या । उच समवाये + ऋज्रेन्द्राग्रेत्यादिना रन् गश्चान्तादेशः । ततष्टाप् ।) यवानी । वचा । इति राजनिर्घण्टः ॥
("दन्तधावने हितं श्रेष्ठं तिलोग्राचर्व्वणं सदा" ।
इति वैद्यकचक्रपाणिसंग्रहे मुखरोगाधिकारे ।) छिक्किकौषधी । इति हेमचन्द्रः ॥ उग्रजातिस्त्री । (यथा मनुः १० । १९ ।
"क्षत्तुर्जातस्तथोग्रायां श्वपाक इति कीर्त्त्यते" ॥)
धन्याकम् । इति रत्नमाला ॥ प्रखरा नारी ॥

उङ्कुणः, पुं, उत्कुणः । इति शब्दमाला ॥ उकुन् इति भाषा ।

उच, इ र य समवायने । मिश्रणे । इति कविकल्पद्रुमः ॥ (दिवां-परं-सकं-सेट् ।) ऋलादिः । इर ऐचत् औचित् । अस्मात् पुषादित्वात् नित्यं ङ इत्यन्ये । य उच्यते केशः क्षणात् । इति दुर्गादासः ॥

उचितं, त्रि, (वच + "शकिवचिकुचिकुटिभ्यः कितच्" इति कितच् प्रत्ययः ।) विदितम् । न्यस्तम् । परिमितम् । युक्तम् । इति हेमचन्द्रः ॥ ग्राह्यम् । इति शब्दरत्नावली ॥

उच्चं, त्रि, (उच्चिनोतीति । चिञ् चित्यां अन्येभ्योऽपि इति डः । उच्चैस्त्वमस्ति अत्र वा । अर्श आद्यच्, अव्ययानामिति टिलोपः ।) उपरि । उँचु इति भाषा । तत्पर्य्यायः । प्रांशु २ उन्नतम् ३ उदग्रम् ४ उच्छ्रितम् ५ तुङ्गम् ६ । इत्यमरः ॥ उत्तुङ्गं ७ । इति तट्टीका ॥ (यथा, रघुः ३।१३ ।
"ग्रहैस्ततः पञ्चभिरुच्चसंश्रयैः,
असूर्य्यगैः सूचितभाग्यसम्पदम्" ।)
(ज्योतिषोक्तं ग्रहाणामुच्चस्थानम् । यथा,
"अजवृषभमृगाङ्गनाकुलीराः
झषवणिजौ च दिवाकरादितुङ्गाः ।
दशशिखिमनुयुक्तिथीन्द्रियांशै-
स्त्रिनवकविंशतिभिश्च तेऽस्तनीचाः" ॥
सूर्य्यादीनां सप्तानां ग्रहाणां मेषवृषभादयो राशयः श्लोकोक्तक्रमविशिष्टा उच्चस्थानानि स्वस्वतुङ्गापेक्षया सप्तमस्थानानि च नीचानि, तत्रोच्चेष्वपि दशमादयो राशित्रिंशांशाः यथाक्रमं उच्चेषु परमोच्चा नीचेषु परमनीचा भवन्तीति ॥)

उच्चकैः, [स्] व्य, (उच्चैस् + अव्ययसर्व्वनाम्नां इति प्रागिवीयेषु अर्थेषु टेः प्रागकच् ।) उच्चैः । अतिशयोच्चम् । इति द्विरूपकोषः ॥ (यथा विष्णुपुराणम् ।
"वशिष्ठाद्यैर्दयासारैः स्तोत्रं कुर्व्वद्भिरुच्चकैः" ।
उन्नतम् । यथा माघे १।१२।
"गिरेस्तडित्वानिव तावदुच्चकै-
र्जवेन पीठादुदतिष्ठदच्युतः" ॥)

उच्चटा, स्त्री, (उत् + चट् + अच् + टाप् ।) गुञ्जा । भूम्यामलकी ।
("उच्चटाचूर्णमप्येवं क्षीरेणोत्तममिष्यते ।
शतावर्य्युच्चटामूलं पेयमेवं बलार्थिना" ॥
इति सुश्रुते चिकित्सितस्थाने २६ ।)
नागरमुस्ता । इति राजनिर्घण्टः ॥ दम्भः । चर्य्या । लशुनप्रभेदः । इति हेमचन्द्रः ॥ तृणविशेषः । निर्व्विषी इति ख्याता । चेँचुया इति केचित् । इत्यमरटीकायां भरतः । तत्पर्य्यायः । चूडाला २ चक्राला ३ । इत्यमरः ॥ अम्बुपत्रा ४ जटिला ५ सुकला ६ उत्तानकः ७ । इति रत्नमाला ॥

उच्चण्डः, त्रि, (उत् चण्डतीति । चडि कोपे + अच् ।) त्वरान्वितः । अविलम्बितः । इत्यमरः ॥

उच्चतरुः, पुं, (उच्चः उन्नतस्तरुः ।) नारिकेलवृक्षः । इति राजनिर्घण्टः ॥ (नारिकेलशब्देऽस्य विवरणं ज्ञातव्यम् ॥)

उच्चतालं, क्ली, (उच्चः महत्तया प्रचण्डस्तालो यत्र ।) पानगोष्ठ्यां नृत्यम् । इति हेमचन्द्रः ॥

उच्चदेवः, पुं, (उच्चः सर्व्वदेवमहत्त्वात् श्रेष्ठः देवः ।) श्रीकृष्णः । इति त्रिकाण्डशेषः ॥

उच्चन्द्रः, पुं, (उत् स्वल्पं अवशिष्टश्चन्द्रो यस्मिन् ।) रात्रिशेषः । इति शब्दरत्नावली ॥

उच्चयः, पुं, (उत् + चि + अच् ।) परिधानवस्त्रग्रन्थिः । तत्पर्य्यायः । नीवी २ । इति हेमचन्द्रः ॥ (पुष्पादीनामुत्तोलनम् । यथा, रघुः १०।४४।
"करिष्यामि शरैस्तीक्ष्णैस्तच्छिरःकमलोच्चयम्" ।
"पुष्पोच्चयं नाटयति" इति शाकुन्तले १माङ्के ॥
राशिः । समष्टिः । यथा,—
"शिलोच्चयोऽपि क्षितिपालमुच्चैः" । रघुः २।५१ ।
"वाक्यं स्याद्योग्यताकाङ्क्षासत्तियुक्तः पदोच्चयः" ।
इति साहित्यदर्पणे । २ । १ ॥)

उच्चलं, क्ली, (उच्चलतीति । उत् + चल् + अच् ।) मनः । इति हेमचन्द्रः ॥

उच्चललाटा, स्त्री, (उच्चमुन्नतं ललाटं यस्याः ।) उन्नतललाटवती । इति त्रिकाण्डशेषः ॥

उच्चाटनं, क्ली, (उत् + चट् + णिच् + ल्युट् ।) उत्खातम् । उचाटन इति भाषा । षट्कर्म्मान्तर्गताभिचारकर्म्मविशेषः । अस्य देवता दुर्गा । तिथिः कृष्णा चतुर्द्दशी अष्टमी च । वारः शनिः । जपमाला साध्यस्य केशसूत्रग्रथिततुरङ्गदशनोद्भवा । फलम् । उच्चाटनं स्वदेशादेर्भ्रंशनं परिकीर्त्तितम् ॥ इति शारदातन्त्रम् ॥

उच्चारः, पुं, (उच्चार्य्यते परित्यज्यते इति । उत् + चर + णिच् + घञ् ।) विष्ठा । इत्यमरः ॥
("मूत्रोच्चारसमुत्सर्गं दिवा कुर्य्यादुदङ्मुखः" ।
इति मनुः ।४।५०।)
"यस्योच्चारं विना मूत्रं सम्यग्वायुश्च गच्छति ।
दीप्ताग्नेर्लघुकोष्ठस्य स्थितस्तस्योदरामयः" ॥
इति सुश्रुते उत्तरतन्त्रे चत्वारिंशत्तमोऽध्यायः ।)
उच्चारणम् ॥

उच्चारणं क्ली, (उत् + चर + णिच् + ल्युट् ।) कथनम् । वाङ्निष्पत्तिकरणम् ॥ यथा । "इसे अकारउच्चारणार्थः" । इति मुग्धबोधव्याकरणे, सन्धिसंज्ञा २ । अपिच ।
"कर्म्मोच्चारणमात्रेण स्पष्टमात्रानुबन्धतः" ।
इति कविकल्पद्रुमः ॥

उच्चावचः, त्रि, (उदक् च अवाक् च । मयूरव्यंसकादित्वात् साधुः ।) अनेकप्रकारः । तत्पर्य्यायः । नैकभेदः २ । इत्यमरः ॥ (यथा, मनुः १।३८।
("उल्कानिर्घातकेतूंश्च ज्योतींष्युच्चावचानि च" ।
"उच्चावचेषु भूतेषु स्थितं तं व्याप्य तिष्ठतः" ।
इति च मनुः ६ । ७३ ॥)

उच्चिङ्गटः, पुं, कृष्णगडुमत्स्यः । कोपनपुरुषः । इति मेदिनी ॥

उच्चूलः, पुं, (उद्गता चूडा यस्य । डस्य लत्वम् ।) ध्वजोर्द्ध्वमुखकूर्च्चः । इति हेमचन्द्रः ॥ निशानेर माग इति भाषा । अस्य पटुका अवचूलः ॥

उच्चैः, [स्] व्य, (उच्चीयते इति । उत् + चि + डैस् ।) उच्चम् । महत् । इत्यमरः ॥ (यथा, कुमारे २।४७ ।
"उच्चैरुच्चैःश्रवास्तेन हयरत्नमहारि च" ।
"शिलोच्चयोऽपि क्षितिपालमुच्चैः" ।
इति रघुः २।५१ । यथा, माघः २ । ५१ ।
"अकृत्वा हेलया पादमुच्चैर्मूर्द्धसु विद्विषाम्" ॥)

उच्चैःश्रवाः [स्] पुं, (उच्चैः श्रवो यशो यस्य । यद्वा उच्चैः श्रवसी यस्य । यद्वा उच्चैः शृणोतीति उच्चैः